भारतीय विद्यालयः डारसैट्

वार्तालापः **उद्यानम्** (Garden)

Class: 7 नाम ______________________________ वर्गः _____ ।

**अन्तरा** अये ! अपूर्वे ! त्वम् इदानीं कुत्र गच्छसि ?

**अपूर्वा** हला अन्तरे ! अहम् इदानीम् उद्यानं गच्छामि । किं त्वं मया सह आगच्छसि ।

**अन्तरा** कुत्र अस्ति उद्यानम् ?

**अपूर्वा** मम गृहस्य समीपे एव एकम् उद्यानम् अस्ति । अहं तत्रैव गच्छामि ।

**अन्तरा** तत्र किम् अस्ति ?

**अपूर्वा** तत्र विविधाः महावृक्षाः बालवृक्षाः सन्ति । तत्र वृक्षेषु विविधाः खगाः वसन्ति ।

**अन्तरा** तत्र के के आगच्छन्ति ?

**अपूर्वा** तत्र प्रातः सायं च जनाः भ्रमणाय आगच्छन्ति । बालकाः अपि तत्र क्रीडन्ति ।

**अन्तरा** उद्यानस्य लाभः कः अस्ति ?

**अपूर्वा** उद्याने वातावरणं शुद्धम् अस्ति । वायुः अपि शुद्धः अस्ति ।

**अन्तरा** पठितं मया यत् उद्यानं स्वास्थ्यवर्धकम् अस्ति । अहमपि त्वया सह आगच्छामि ।

**अपूर्वा** अवश्यम् आगच्छतु । गच्छावः ।

## वार्तालाप: - आदिकाव्यम्

छात्रा: - अध्यापक ! नमो नम: |

शिक्षक: - प्रियच्छात्रा: ! नमो नम: |

छात्रा: - वयं सर्वे किञ्चित् ज्ञातुम् इच्छाम: | किञ्चित् प्रष्टुं शक्यते ?

शिक्षक: - अवश्यम् पृच्छन्तु | कस्मिन् विषये संदेह: अस्ति ?

छात्रा: - संस्कृतस्य प्रथमं काव्यं किम् ?

शिक्षक: - संस्कृतस्य प्रथमं काव्यं रामायणम् अस्ति |

छात्रा: - अध्यापक ! रामायणस्य रचयिता क: अस्ति ?

शिक्षक: - रामायणस्य रचयिता महर्षि: वाल्मीकि: |

छात्रा: - आदिकाव्यं किं अस्ति ?

शिक्षक: - रामायणम् एव आदिकाव्यम् अस्ति |

छात्रा: - एवम् | रामायणे किम् लिखितम् ?

शिक्षक: - रामायणे श्रीरामस्य चरितं वर्णितम् | श्रीराम: अयोध्याया: राजा आसीत् |

छात्रा: - धन्यवाद: |